त्रिकरायोपरथ्यास्तु द्विकराण्युपरथ्यका ॥
चतुर्थपथचतुष्पादद्विपादस्य ग्रहान्तरम् ।
तृतीयपादखर्ड्डपाद: प्राग्वंश: पादक: स्मृत: ॥
अवकर: परीवार: पादमात्र: समन्तत: ॥"
इति देवीपुराणे गोपुरद्वारलक्षणाध्याय: ॥ * ॥
चतुष्पथलक्षणादि यथा,—
"एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे ।
तत्रस्थ: साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥
चतुष्पथन्तु तत् प्रोक्तं त्रिकोणं यत्र वर्त्तते ॥"
इति नीलतन्त्रम् ॥ * ॥
पथगमनगुणा: ।
"अध्वा मेद:कफस्थौल्यसौकुमार्य्यविनाशन: ।
यत्तु चङ्क्रमणं नातिदेहपीड़ाकरं भवेत् ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ॥"
इति राजवल्लभ: ॥ * ॥
ब्राह्मणादिभ्य: पथावकाशो देयो यथा,—
"पन्था देयो ब्राह्मणाय स्त्रियै राज्ञे ह्यचक्षुषे ।
वृद्धाय भारभुग्नाय रोगिणे दुर्ब्बलाय च ॥"
इति कौर्म्मे उपविभागे ११ अध्याय: ॥ * ॥
गोपथदानफलं यथा,—
"गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम् ।"
इति प्रतिष्ठातत्त्वे हयशीर्षपञ्चरात्रम् ॥ * ॥
अस्याचाराद्यनुसारो यथा,—
"तर्कोऽप्रतिष्ठ: श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गत: स पन्था: ॥"
इति महाभारते । ३ । ३१२ । ११२ । धर्म्मबकप्रश्ने युधिष्ठिरोत्तरम् ॥ * ॥ नरकविशेष: । यत्रा-टाप्यते । इति मनौ ४ अध्याय: ॥

पन्नं, त्रि, ( पद्लौ ङ गतौ + "गत्यर्थेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्त: । ) च्युतम् । गलितम् । इत्यमर: । ३ । १ । १०४ ॥

पन्न:, पुं, ( पन स्तुतौ + "कृञ्ञ् सिद्दपनीति ।" उणां । ३ । १० । इति न: स च नित् । ) अधोगमनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

पन्नग:, पुं, ( पन्नं अधोगमनं पतितं वा गच्छतीति । गम ऌ गतौ + "सर्व्वत्र पन्नयोरुपसंख्यानम् ।" ३ । २ । ४८ । इत्यस्य वार्त्ति इति ड: । पद्भ्यां न गच्छतीति वा विग्रह: । ) सर्प: । इत्यमर: । १ । ८ । ८ ॥ ( यथा, विष्णुपुराणे । १ । १७ । ७ ।
"प्रासासक्तं महात्मानं हिरण्यकशिपुं तदा ।
उपासाञ्चक्रिरे सर्व्वे सिद्दगन्धर्व्वपन्नगा: ॥" )
औषधीभेद: । पद्मकाष्ठम् । इति मेदिनी ॥

पन्नगकेशर:, पुं, ( पन्नगवत् केशरो यस्य । ) नागकेशरपुष्पम् । इति राजनिर्घण्ट: ॥

पन्नगाशन:, पुं, ( पन्नगं सर्पं अश्नातीति । अश ग भोजने + ल्यु: । पन्नग: अशनं भक्ष्यो यस्येति वा । ) गरुड़: । इत्यमर: । १ । १ । ३१ ॥

पन्नगी, स्त्री, ( पन्नग + जातौ ङीष् । ) पन्नगपत्नी । ( यथा, भागवते । ३ । १८ । ११ ।
"तां स आपततीं वीक्ष्य भगवान् समवस्थित: ।
जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥")
मनसा देवी । यथा, तिथितत्त्वे ।
"पञ्चम्यामसिते पक्षे सुप्तोत्तिष्ठति पन्नगी ॥"
सर्पिणीक्षुप: । इति राजनिर्घण्ट: ॥

पन्नद्धा, स्त्री, ( पदि नद्धा बद्धा । ) चर्म्मपादुका । इति हेमचन्द्र: ॥

पन्नद्धी, स्त्री, ( पदोश्चरणयोर्नद्धी । ) चर्म्मपादुका । इति त्रिकाण्डशेष: ॥

पपि:, पुं, ( पाति लोकम् । पिबति वा । पा + "आदृगमहनजन: किकिनौ लिट् च ।" ३ । २ । १७१ । इति कि: द्वित्वञ्च । ) चन्द्र: । पानकर्त्तरि त्रि । इति संक्षिप्तसारव्याकरणम् ॥ ( यथा, ऋग्वेदे । ६ । २३ । ४ । "पपि: सोमं ददिर्गा: ॥")

पपी:, पुं, ( पाति लोकम् । पा रक्षणे + "पापो: कित् द्वे च ।" उणां । ३ । १५६ । इति ईक् द्वित्वञ्च । ) सूर्य्य: । चन्द्र: । इत्युणादिकोष: ॥

पपु:, पुं, ( पाति रक्षतीति । "कुर्भ्रश्चेति ।" उणां । १ । २३ । इति चकारात् अन्यतोऽपि कुर्द्वित्वञ्च । ) पालक: । धात्र्यां स्त्री । इत्युणादिकोष: ॥

पमरा, स्त्री, गन्धद्रव्यविशेष: । सल्लकी इति ख्याता । अस्यानुलेपनगुण: । परमाकक्षीरच्चोज्वरनाशित्वम् । इति राजवल्लभ: ॥

पम्पा, स्त्री, ( पाति रक्षति मत्स्यादीन् स्वीयपवित्रसलिलदानादिभिरिति शेष: । पा पालने + "खष्प-शिल्प-शष्प-वाष्प-रूप-पम्पा-तल्पा: ।" उणां । ३ । २८ । इति निपातनात् ह्रस्वत्वे सुड़ागमत्वे च साधु: । ) ओड्रदेशस्थनदीविशेष: । इत्युणादिकोष: ॥ ( यथा, रघु: । १३ । ३० ।
"दूरावतीर्णा पिबतीव खेदा-
दमूनि पम्पासलिलानि दृष्टि: ॥"
इयं हि ऋष्यमूकपर्व्वतसन्निकटस्था । इति रामायणम् ॥ )

पम्ब, गतौ । ( भ्वां-परं-सकं-सेट् । ) ओष्ठ्यवर्गशेषोपध: । पम्बति । इति दुर्गादास: ॥

पय, ङ गतौ । इति कविकल्पद्रुम: ॥ ( भ्वां आत्मं सकं सेट् । ) ङ, पयते । इति दुर्गादास: ॥

पय:, [स्] क्ली, ( पय्यते पीयते वा पय गतौ पी ङ पाने वा + "सर्व्वधातुभ्योऽसुन् ।" उणां । ४ । १८८ । इत्यसुन् । ) जलम् । (यथा, रघु: । १ । ६७ ।
"पय: पूर्व्वै: स्वनिश्वासै: कवोष्णमुपभुज्यते ॥")
दुग्धम् । इति मेदिनी ॥ ( यथा, मनु: । ३ । ८२ ।
"कुर्य्यादहरह: श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्व्वापि पितृभ्य: प्रीतिमावहन् ॥")

पय:कन्दा, स्त्री, ( पय: कन्दे यस्या: । ) क्षीरविदारी । इति राजनिर्घण्ट: ॥

पय:फेनी, स्त्री, ( पयो दुग्धमिव फेनमस्या: । गौरादित्वात् ङीष् । ) दुग्धफेनीक्षुप: । इति राजनिर्घण्ट: ॥

पयश्चय:, पुं, ( पयसां चय: समूह: । ) जलसमूह: । तत्पर्य्याय: । पूर:२ वेणि: ३ । इति जटाधर: ॥

पयस्यं, त्रि, ( पयसो विकारस्तत्र हितं वा । पयस् + "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् । ) पयोविकार: । घृतदध्यादि । इत्यमर: । २ । ६ । ५१ ॥ पयोहितम् । इति मेदिनी ॥

पयस्य:, पुं, ( पय: पिबतीति । ) विड़ाल: । इति शब्दचन्द्रिका ॥

पयस्या, स्त्री ( पयस्य + टाप् । ) दुग्धिका । क्षीरकाकोली । स्वर्णक्षीरी । इति मेदिनी ॥ अर्कपुष्पिका । इति रत्नमाला ॥ कुटुम्बिनीक्षुप: । इति राजनिर्घण्ट: ॥ आमिक्षा । इति हेमचन्द्र: ॥

पयस्वल:, पुं, ( पयोऽस्त्यस्य । पयस् + "अन्येभ्योऽपीति ।" वलच् । ) छाग: । इति राजनिर्घण्ट: ॥

पयस्विनी, स्त्री, ( पयो विद्यतेऽस्या: । "अस्मायामेधास्रजो विनि: ।" ५ । २ । १२१ । इति विनि: ततो ङीष् । ) नदी । ( प्रशस्तजलवत्त्वात्तथा पुण्यसलिलत्वात् गङ्गा । यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने । २९ । १०६ ।
"परापरफलप्राप्ति: पावनी च पयस्विनी ॥" )
धेनु: । ( यथा, रघु: । २ । २१ ।
"प्रदक्षिणीकृत्य पयस्विनीन्तां
सुदक्षिणा साक्षतपात्रहस्ता ॥" )
रात्रि: । इति मेदिनी ॥ काकोली । क्षीरकाकोली । दुग्धफेनी । क्षीरविदारी । छागी । इति राजनिर्घण्ट: ॥ जीवन्ती इति भावप्रकाश: ॥ ( गायत्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ६६ ।
"प्रज्ञावती सुता पौची पुत्त्रपूज्या पयस्विनी ॥")

पयोगड़:, पुं, ( पयसो गड़ इव । ) घनोपल: । द्वीप: । इति शब्दमाला ॥

पयोघन:, पुं, ( पयोभिर्घन: सान्द्र: । ) घनोपल: । इति हारावली ॥

पयोजन्मा, [न्] पुं, (पयसो जलस्य जन्म यस्मात् ।) मेघ: । इति शब्दमाला ॥

पयोधर:, पुं, ( धरतीति धर: । धृ + अच् । पयसो दुग्धस्य जलस्य वा धर: । ) स्तन: । ( यथा, रघु: । १४ । २२ ।
"षड़ाननापीतपयोधरासु
नेता चमूनामिव कृत्तिकासु ॥" )
मेघ: । इत्यमर: । ३ । ३ । १६३ ॥ कोषकार: । नारिकेलम् । कशेरु । इति मेदिनी ॥

पयोधा:, [स्] पुं, (पयो जलं दधातीति । डु धा ञ् धारणे + "पयसि च ।" उणां । ४ । २२६ । इति असि: ।) समुद्र: । जलाधार: । इत्युणादिकोष: ॥

पयोधि:, पुं, (पयांसि धीयन्तेऽस्मिन् । डु धा ञ् + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति कि: । ) समुद्र: । इति राजनिर्घण्ट: ॥

पयोधिकं, क्ली, ( पयोधौ समुद्रे कायति प्रकाशते इति । कै + क: । ) समुद्रफेन: । इति राजनिर्घण्ट: ॥